द्वितीयः पाठः

# जयदेवस्य औदार्यम्



गीतगोविन्दस्य रचयिता जयदेवः सुप्रसिद्धः महाकविः। सः कदाचित् तीर्थयात्रां कुर्वन् आसीत्। जयदेवस्य कीर्तिः देशे सर्वत्र प्रसृता आसीत्। अतः मार्गे तत्र तत्र जनाः तस्य सम्माननं कुर्वन्ति स्म। तस्मै धनमपि अर्पयन्ति स्म।

केचन लुण्ठकाः एतत् ज्ञातवन्तः। जयदेवस्य धनम् अपहर्तुं ते एकम् उपायं चिन्तितवन्तः। तेऽपि यात्रिकाः इव वेषपरिवर्तनं कृत्वा जयदेवेन सह तीर्थयात्रायां मिलिताः। मध्येमार्गं यदा ते अरण्यं प्रविष्टवन्तः तदा लुण्ठकाः जयदेवस्य पाणिपादं कर्तयित्वा तम् एकस्मिन् कूपे क्षिप्तवन्तः। तदीयं धनं सर्वम् अपहृत्य ततः पलायनं कृतवन्तः।

दैवात् तस्मिन् कूपे जलं न आसीत्। कूपे पतितः जयदेवः किञ्चित्कालानन्तरं चेतनां प्राप्तवान्। ततश्च तत्र एव उपविश्य उच्चैः भगवतः नामस्मरणं कर्तुम् आरब्धवान्।

तद्दिने गौडेश्वरः लक्ष्मणसेनः तेन एव मार्गेण गच्छन् आसीत्। सः कूपतः मनुष्यस्य ध्वनिं श्रुत्वा सेवकैः तत्र पतितं जयदेवम् उपरि आनायितवान्। तं स्वेन सह राजधानीं नीतवान् च। बहुवारं पृष्टः अपि जयदेवः स्वस्य पाणिपादं कर्तितवतां लुण्ठकानां विषये किमपि न उक्तवान्। जयदेवस्य भगवद्भक्तिं साधुस्वभावं च दृष्ट्वा महाराजः एवं प्रभावितः अभवत् यत् सः तं स्वस्य आस्थानपण्डितम् अकरोत्।

राजभवने कदाचित् कश्चन उत्सवः आयोजितः आसीत्। तदा बहवः साधवः, ब्राह्मणाः, भिक्षुकाश्च भोजनार्थं तत्र सम्मिलिताः। जयदेवस्य पाणिपादं ये कर्तितवन्तः तेऽपि लुण्ठकाः भिक्षुकवेषेण तत्र आगताः आसन्। ते भिन्नगात्रं जयदेवं दृष्ट्वा अभिज्ञातवन्तः। परं पण्डितस्थाने तं दृष्टवतां तेषां प्राणाः गताः इव। जयदेवः अपि तान् अभिज्ञातवान्। सः महाराजम् उक्तवान्– "एते सन्ति मम पूर्वतनसुहृदः। भवान् यदि इच्छति तर्हि एतेभ्यः किमपि दातुम् अर्हति" इति।

महाराजः तान् समीपम् आहूतवान्। भूरिधनदानेन तान् सत्कृतवान् च। ततः 'एतान् सुरक्षितरूपेण गृहं प्रापय्य आगच्छन्तु' इति सेवकान् आदिष्टवान्।

मार्गे गमनसमये सेवकाः कुतूहलेन तान् पृष्टवन्तः– "भोः, भवताम्, अस्माकम् आस्थानपण्डितस्य च कः सम्बन्धः?" इति।

दुरात्मनः ते लुण्ठकाः उक्तवन्तः– "पूर्वं कस्मिंश्चित् राज्ये भवतां पण्डितः अस्माभिः सह राज कर्मचारी आसीत्। तत्र कदाचित् तेन तादृशः अपराधः आचरितः, येन कुपितः राजा तस्य वधदण्डनम् आदिष्टवान्। किन्तु वयं तस्य विषये दयां कृत्वा पाणिपादं केवलं कर्तयित्वा तं सजीवं मोचितवन्तः। एतत् रहस्यं वयं कदाचित् वदेम इति भीत्या सः एवम् अस्माकं सम्माननं कारितवान्।" इति।

तदा लुण्ठकानाम् एतादृशं व्यवहारं सोढुम् अशक्तवती भूमिः स्वयमेव विदीर्णा अभवत्। लुण्ठकाः तत्र पतित्वा मृताः अभवन्। सेवकाः खेदेन ततः प्रतिगम्य जयदेवं महाराजं च वृत्तं निवेदितवन्तः। सर्वं श्रुत्वा जयदेवः– "हन्त! मया चिन्तितं यत् एते निर्धनाः सन्ति। धनलोभेन पापं

कुर्वन्ति। धनं यदि लभ्यते तर्हि अग्रे पापं न कुर्युः, इति। परन्तु निर्भाग्यस्य मम कारणतः तैः प्राणाः त्यक्तव्याः अभवन्। हे भगवन्! तेभ्यः सद्गतिं ददातु" इति।

तत्क्षणादेव जयदेवस्य कर्तितं पाणिपादं पुनः यथापूर्वम् उत्पन्नम् अभवत्। अहो औदार्यं जयदेवस्य।

## अभ्यासः

1. जयदेवः कः आसीत्?
2. अनया कथया का शिक्षा प्राप्यते?
3. मार्गे सेवकैः पृष्टाः लुण्ठकाः किम् उक्तवन्तः?

★★★